गमनेनानयः अयानयः शीर्षस्थानम् । तत् नेयः ख । द्यूतविशेषे हि चतस्रोवीथयः प्रत्येकं द्वादशकोष्ठोपेताः शारास्तु त्रिंशत् ते च एकैककितवेन पञ्चदशशो याह्याः स्ववामपार्श्वस्थप्रथमकोष्ठपर्य्यन्तमारभ्यान्तिमकोष्ठरूपंशीर्षस्थानरूपमयानयं दक्षिणावर्त्तेनापसव्यगत्या सर्व्वेऽपि शारा नेया अतस्ते अयानयीना इत्युच्यन्ते तत्रायं प्रकारः "ससहायस्य शारस्य परैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेण हन्यते इत्युक्तदिशाव-सेयः । परैः परकीयैः नाक्रम्यते द्व्यादिशाराश्रितकोष्ठं नाक्रम्यते परकीयशारेण तत्स्थानाक्रमणेन प्रतिरोधात् । असहायस्तु हन्यते इत्यतः प्रतिरोधाजनकः "अनुपदसर्व्वायानयं बद्धा भक्षयति नेयेषु" पा० "अयानयः स्थानविशेषः तं नेयः अयानयीनः शारः" सि०कौ ।

**अयाशु** त्रि० अयमश्नाति नाशयति अश—उ—ईत० । शुभावहविधिलोपके यातुधानभेदे "खलजाःशकधूमजा उरुण्डा ये च मट्मटाः कुम्भमुष्का अयाशवः । तानस्या ब्रह्मणस्पतेः प्रतीबोधेन नाशय" अथ० ८,६,१५ ।

**अयास्य** त्रि० यस—णिच्—शक्यार्थे यत् न०त० । १उपक्षपयितुमशक्ये "अयुजो असमोन्टभिरेकः कृष्टीरयास्यः" ऋ० ८,६२,२, "अयास्यः उपक्षपयितुमशक्यः" भा० । यासः प्रयत्नस्तत्साध्यः यत् न०त० । २ युद्धरूपसाधनैः साधयितुमशक्ये शत्रौ। आस्यादयते निर्गच्छति अच् ष्ट०पदव्यत्ययः । ३ मुखेन निर्गमनवृत्तिके प्राणवायौ उपचारात ४ तदुपासके अङ्गिरसि ऋषिभेदे । "अयास्यः स्तवमानेभिरर्कैः" ऋ० १,६२,७, "अयास्यः यासः प्रयत्नः तत्साध्यो यास्यः न यास्योऽयास्यः । युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः यद्वा अयास्यः पञ्चवृत्तिर्मुख्यः प्राणः । स ह्यास्यान्मुखादयते गच्छति निष्क्रामति । तदुपासकोऽप्यङ्गिगिरा उपचारादयास्य उच्यते । तथा च छन्दोगैराम्नातम् "तं हायास्य उद्गीथमुपासाञ्चक्रे एतमु एवायास्यं मन्यन्ते आस्याद्यदयते तेनेति" । अथवा अयमास्ये मुखे वर्त्तत इत्ययास्यः तथा च वाजसनेयकम् 'ते होचुः क नु सोऽभूद्योन इत्यमसक्तोत्ययमास्यान्तरितीति" । पूर्ववदुपासकोऽप्ययास्यः" भा० ।

**अयि** अव्य० इण—इन् । १प्रश्ने, २अनुनये, ३संबोधने, ४अनुरागे च "अयि सम्प्रति देहि दर्शनम्" "अयि जीवितनाथ । जीवसि" इति च कुमा० । "अयि जानीषे रेभिलस्य सार्थवाहस्य गृहम्" मृच्छ० ।

**अयुक्छद** पु० अयुग्माः सप्त सप्त छदा अस्य । सप्तपर्णे वृक्षे तस्य हि प्रत्येकपल्लवे सप्त सप्त पर्णानि विद्यन्ते । "वनुरयुक्छदगुच्छसुगन्धयः" माघः । अयुक्पत्रादयोऽप्यत्र ।

**अयुक्त** त्रि० युज—क्त न०त० । १विषयान्तरासक्ततया कर्त्तव्येष्वनवहिते, २अनुचिते, ३आपद्गते ४असंयुक्ते च "अयुक्तः प्राकृतस्तब्धः शठो नैकृतिकोऽलसः गीता" अयुक्तः अनवहित इति आ०त० रघु० । "नचायुक्तस्य भावना" गीता ५अयोग्ये "अयुक्तरूपं किमतः परं वद" कुमा० । अयुक्तं शपथं कुर्व्वन्नयोग्योयोग्यकर्म्मकृत् । ६बहिर्मुखे "अयुक्तः कामकारेण फले सक्तोनिबध्यते इति गीता" "अयुक्तः बहिर्मुखः" म०त० रघु० । युक्तियुक्तं युक्तम् न०त०७युक्तिशून्ये त्रि० । "अयुक्तं यदिह प्रोक्तम्" इति दुर्गादासः ८अनियोजिते च । "अयुक्तचारप्राणधिः नीति० ।

**अयुक्ति** स्त्री अभावे न०त० । १युक्त्यभावे । न०ब० । २युक्तिशून्ये ३योजनशून्ये च त्रि० ।

**अयुग** न०त० । युग्मभिन्ने (विजोड़) विषमे । "युगपदयुगसप्तिस्तुल्यसंख्यैर्मयूखैः" माघः अयुगनेत्रः त्रिनेत्रः अयुगेषुः पञ्चशरः १अयुगलादयोऽप्यत्र । न०ब० । २युगशून्ये त्रि० । ३भग्नयुगे रथादौ

**अयुगपद्** अव्य० न०त० । युगपद्भिन्ने क्रमिकभवने ।

**अयुगू** स्त्री एति बन्ध्यत्वम् इण्—उन् अयुगो यते गै—कू । काकबन्ध्यायां स्त्रियाम् । "अयुगूः काकबन्ध्या या जाता तां न विवाहयेत्" कात्या० स्मृतिः ।

**अयुग्म** न० न०त० । युग्मभिन्ने (विजोड़) १विषमे । यथा संख्यायामेकत्रिपञ्चसप्तादयः । न०ब० । २तत् संख्यान्विते त्रि० । "अथेन्द्रिचक्षोभमयुग्मनेत्र" इति कुमा० । अयुग्मशरः पञ्चवाणः । अयुग्मच्छदः सप्तच्छदः अयुग्मवाहः सप्ताश्वः । "अयुग्मे विधवा नारी" उ०त०पु० "युग्मासु पुत्राजायन्ते स्त्रियोऽयुग्मासु रात्रिषु" मनुः । "द्वादशराशिषु विषमसंख्यान्वितेषु मेषमिथुनसिंहतुलाधनुःकुम्भेषु" श्लोके प्रथमतृतीयचरणयोः ।

**अयुग्मनेत्र** पु० अयुग्मानि नेत्राण्यस्य । त्रिनेत्रे महादेवे "अथेन्द्रियक्षोभमयुग्मनेत्रः" कु० । अयुग्मलोचनादयोऽप्यत्र ।

**अयुग्मच्छद** पु० अयुग्माः सप्त सप्त च्छदा अस्य । सप्तच्छदे (छातिम्) वृक्षे अयुग्मपत्रादयोऽप्यत्र ।

**अयुग्मवाह** पु० अयुग्माः सप्त वाहा अस्य । सप्ताश्वे सूर्य्ये । अयुग्माश्वादयोऽप्यत्र ।